संस्कृतवाङ्मये वर्णितस्य वानप्रस्थाश्रमस्य समीक्षात्मकम् अध्ययनम्

कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य संस्कृतसाहित्यविभागस्य

विद्यावारिधिपदव्याः

शोधकार्यस्य शोधसंक्षिप्तिकासमर्पणम्

(Research Proposal)

संशोधिका

भक्ति केळकर

मार्गदर्शिका

प्रो. नन्दा ज. पुरी

मा. अधिष्ठात्री

संस्कृतभाषा-साहित्यविभाग-संस्कृतेतरभाषासङ्कायश्च

संस्कृतसाहित्य तथा संस्कृतेतरभाषासङ्कायः

कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयः

रामटेकम्, महाराष्ट्रम्

२०२१-२०२२

अनुक्रमणिका

१.	प्रस्तावना
२.	विषयचयनस्य प्रयोजनम्
३.	समस्याकथनमावश्यकता च
४.	संशोधनस्य उद्देशः अपेक्षा च
५	शोध-परिकल्पना
६.	पूर्वसंशोधनम्
७.	शोध पद्धतिः
८.	व्याप्तिः मर्यादा च
९.	शोधप्रबन्धस्य अध्यायविभागः
१०	सन्दर्भग्रंथसूची

उद्घाट्य योगकलया हृदयाब्जकोशं धन्यैश्चिरादपि यथारुचिगृह्यमाणः,
यः प्रस्फुरत्यविरतं परिपूर्णरूपः श्रेयः स मे दिशतु शाश्वतिकं मुकुन्दः।

प्रस्तावना-

शतायुर्वै पुरुषः इति प्रायोवादानुसारं मानवजीवनं शतवार्षिकम् अस्ति। सर्वोऽपि शतायुर्न भवितुमर्हति। जिजीविषेदेकैकोऽपि शतं समा इति भारतीयसंस्कृतिरिदं शतवार्षिकं मानवजीवनं चतुर्षु भागेषु विभक्तम्। इमे भागा आश्रम पदेनाभिधीयन्ते। ब्रह्मचर्य-गृहस्थ-वानप्रस्थ-सन्यासश्च इति चत्वारः एते आश्रमाः। सर्वेष्वपि धर्मसूत्रग्रन्थेषु, स्मृतिर्ग्रंथेषु च एते आश्रमा वर्णिताः सन्ति । आ उपसर्गपूर्वकात् श्रम धातोः घञ् प्रत्यययोगे आश्रम शब्दोऽयं निष्पद्यते। आ शाम्यन्ति अस्मिन् इति आश्रमः' इति व्युत्पत्त्या अस्य अर्थः स्पष्टः।

बाल्ये वयसि अभ्यस्तविद्यानाम् तारुण्ये भोगाभिलाषिणाम्, वार्द्धके वयसि मुनिवृत्तीनाम्, अन्ते परमात्मध्यानेन देहत्यागिनाम् इति रघूणामन्वयं विवक्षता महाकविना कालिदासेन आश्रमचतुष्टयमभिवर्णितम् । तथा हि-

शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।
वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्॥

[रघुवंशः, प्रथमसर्गः, अष्टमश्लोकः]

आश्रमधर्मपालनेन मानवजीवनस्य चतुर्वर्गाणां धर्मार्थकाममोक्षाणां फलप्राप्तिर्भवति।

ब्रह्मचर्याश्रमे विद्याध्ययनेन, तपोमयजीवनयापनेन, सर्वविधगुणानां सङ्ग्रहणेन च धर्मप्राप्तिः।

गृहस्थाश्रमे भौतिक-शारीरक-मानसिकानां समुन्नत्या, भौतिकविषयाणाम् उपभोगेन, दाम्पत्यजीवनयापनेन वंशप्रतिष्ठायै सन्तानोत्पत्या च धर्मार्थकामानां त्रिवर्गफलसिद्धिः ।

वानप्रस्थाश्रमे सपत्नीकेनेश्वराराधनं, संयमपालनं, योगादिकर्मसु प्रवृत्तिरित्येवं वैराग्यप्राप्तिः ।

संन्यासाश्रमे वैराग्यभावबलात् भौतिकविषयान् परित्यज्य योगाभ्यासरतः सन् परमपुरुषार्थं मोक्षम् आसाधयेत् इति मनीषिभिः इयम् आश्रमव्यवस्थोद्दिष्टा ।

तर्हि अस्याम् आश्रमव्यवस्थायां वानप्रस्थाश्रमस्य वर्णनं बहुषु स्थानेषु उपलभ्यते यथा वेदेषु, अष्टादशस्मृतिग्रन्थेषु, उपनिषत्सु, धर्मसूत्रग्रन्थेषु देवीभागवतपुराणे, रामायणे, महाभारते च, लौकिकसाहित्ये यथा रघुवंशमहाकाव्ये इत्यादिषु अस्य वानप्रस्थाश्रमस्य वर्णनम् उपलभ्यते परं न केनापि इतःपूर्व अस्य विषयस्य स्वतन्त्ररूपेण समीक्षा कृता। अतः विषयस्यास्य गाम्भीर्यं महत्त्वं च परिज्ञानाय प्रतिपादनाय च संस्कृतवाङ्मये वर्णितस्य वानप्रस्थाश्रमस्य समीक्षणात्मकम् अध्ययनं भविष्यति ।।

<u>विषयस्य अस्य चयने निदानम्</u> -

अस्माभिः सर्वैः ज्ञातं यत् परमपुरुषार्थो मोक्षः इति। परमपुरुषार्थरूपस्य तस्य स्वरूपप्रतिपत्तये, प्रवृत्तानि नैकविधानि दर्शनानि शास्त्राणि च। उपर्युक्तं खलु 'संन्यासाश्रमे वैराग्यभावबलात् भौतिकविषयान् परित्यज्य योगाभ्यासरतः सन् परमपुरुषार्थं मोक्षम् आसाधयेत् इति। तर्हि ततः वैराग्यप्राप्तिः कुतः? इति जिज्ञासायां- वानप्रस्थाश्रमे सपत्नी के नेश्वराराधनं, संयमपालनं, योगादिकर्मसु प्रवृत्तिरित्येव वैराग्यप्राप्तिः इत्युक्तम्। अतः वैराग्यप्राप्त्यर्थं वानप्रस्थाश्रमस्य समीक्षा अत्यंतावश्यकी वर्तते इति मे मतम्।

यतोहि आधुनिक-काले ब्रह्मचर्याश्रम्-ग्रहस्थाश्रमयोः च अनुकरणं सर्वत्र दृश्यते, परन्तु ये वानप्रस्थाश्रमम् आचरन्ति ते तु न्यूनाः सन्ति। अतः अस्मिन् जगति वैराग्यप्राप्यर्थं सुगमः मार्गः दर्शितः 'वानप्रस्थाश्रम' इति आश्रमस्यास्य गाम्भीर्यं महत्वं च परिज्ञानाय, लोककल्याणाय, मानवजीवने वैराग्यस्य महत्वं प्रतिपादनाय च विषयोऽयं चितः। तस्मात् एतद्विषये एव गहनम् अध्ययनं कर्तव्यम् इति विचार अवर्तत।

<u>समस्याकथनमावश्यकता च-</u>

'अहो! कष्टमिदं वर्तते जन्तूनाम्।' वयं दृष्टुं शक्नुमः, आधुनिककाले परिवारेषु वृद्धानां दशा कीदृशी वर्तते । तेषां मानसिकी-शारिरिकी-सामाजिकी च स्थितिः सम्यग् न दृश्यते। वृद्धो भूत्वापि तेषां मनासि संसारासक्तिः परिलक्ष्यते । तेषां कृते वृद्धाश्रमव्यवस्था न भवेत्। तेषां ज्ञानस्य अनुभवस्य च सार्थकत्वं चिन्तयित्वा तेषां कृते वानप्रस्थाश्रमस्य पुनर्नियोजनस्य आवश्यकता वर्तते।

<u>संशोधनस्य उद्देशः अपेक्षा च-</u>

- आधुनिक-समाजे वृद्धानां समस्यानां निराकरणाय वानप्रस्थाश्रमस्य समीक्षा।
- अनुसंधानस्यास्य उद्देश्यमस्ति यत् प्राचीनसंस्कृतवाङ्गयस्य दूरदृष्टिप्रदर्शनेन तस्य सार्वकालित्व प्रतिपादनम्।
- आत्मोद्धाराय जगद्हिताय च वानप्रस्थाश्रमस्य सामाजिक-दृष्ट्या, मनोवैज्ञानिक-दृष्ट्या, धार्मिक-दृष्ट्या चात्र समीक्षा भविष्यति।

<u>शोध परिकल्पना –</u>

इदं जगत् अपि अस्माकं कुटुंबमस्ति इति चिन्तयितुं वानप्रस्थैव अवसरं ददाति।आत्मोद्धारः इह संसारस्य कल्याणञ्च एव वानप्रस्थाश्रमस्य उद्देशः वर्तते। जनानां मनसि वसुधैव कुटुंबकम् इति भावना जनयितुं वानप्रस्थाश्रमस्य पुनर्नियोजनम् भवतु इति अस्य शोधस्य परिकल्पना।

पूर्वसंशोधनम्-

स्मृतिग्रन्थेषु वर्णितस्य वानप्रस्थाश्रमस्य आधुनिक कालस्य वृद्धाश्रमेण सह एकं तुलनात्मकम् अध्ययनम् उपलभ्यते। तत्र ब्रह्मचर्याश्रमस्य स्वतन्त्ररूपेण कृतं पूर्वसंशोधनम् उपलभ्यते, परं अनयोः संशोधनयोः वानप्रस्थाश्रमस्य सामाजिकी-मनोवैज्ञानिकी-धार्मिकीच समीक्षा न दृश्यते, एतावत्पर्यंतं वानप्रस्थाश्रमस्य स्वतंत्ररूपेण कृतं पूर्वसंशोधनं नोपलब्धं वर्तते।

(1) Smrutigranthatil vanprasthashramvyavastha va ajache vrudhashram_ek tulanatmak abhyas

(2) Relevance of Brahmacharyashrama A Study

संबंधित शोधपत्राणि-

The Indian concepts of lifestyle and mental health in old age S. C. Tiwari and Nisha M. Pandey

Hermann Hesse's Siddhartha - A Dualist Spiritual Journey S. B. Bhambar, M.A., M.Phil., Ph.D

Ashram life style Anuradha Vinayak Associate Professor and Head Department of Ancient Indian History and Archaeology BSNY.P.G. College,lucknow

Allegorical Expression and Shift of Social Systems in the Vedic Culture Sanjay Mishra

शोधपद्धतिः-

संशोधनस्यास्य पद्धतिः समीक्षात्मिका भविष्यति।

व्याप्तिः मर्यादा च-

वेदेषु स्मृतिग्रन्थेषु, आरण्यकग्रन्थेषु, उपनिषत्सु, पुराणेषु, धर्मशास्त्रे, रामायणे, महाभारते, लौकिकसाहित्ये विषयस्यास्य व्याप्तिः।

वैदिककालादारभ्य लौकिककालपर्यन्तम् यानि उपर्युक्तानि ग्रंथाः सन्ति तेषु ग्रंथेषु समेषाम् आश्रमाणां वर्णनमस्ति तेभ्यः केवलं वानप्रस्थाश्रमस्य एव अध्ययनमत्र भविष्यति।

आश्रमेषु केवलं वानप्रस्थाश्रमस्य स्वतन्त्ररूपेण विचारः भविष्यति इति विषयस्यास्य मर्यादा। अस्य विषयस्य सामाजिक-दृष्ट्या, मनोवैज्ञानिक-दृष्ट्या, धार्मिक-दृष्ट्या चात्र समीक्षा भविष्यति।

शोधप्रबन्धस्य अध्याय-विभागाः

उपोद्घातः-

प्रथमोऽध्यायः - भारतीय-संस्कृत्याम् आश्रमपद्धतिः

- संस्कृतवाङ्मये वर्णितानां समस्ताश्रमपद्धतीनाम् विवरणमस्मिन् अध्याये भविष्यति।

द्वितीयोऽध्यायः- वानप्रस्थाश्रमस्य सार्वभौमिक-चिन्तनम्

- संस्कृतवाङ्मये वानप्रस्थाश्रमस्य माध्यमेन् आगतायाः गुरु-शिष्यपरंपरायाः वर्णनम्, निसर्गपर्यावरणयोः व्यवस्थायाः वर्णनम्, आश्रमचक्रस्य विवरणम्, यज्ञादीनां विवरणञ्च अस्मिन् अध्याये भविष्यति।

तृतीयोऽध्यायः - संस्कृतसाहित्ये वानप्रस्थाश्रमस्य स्वरूपम्

- वानप्रस्थाश्रमस्य अनुकरणं कथं अभवत्? अस्माकं संस्कृतसाहित्ये कानि उदाहरणानि सन्ति? एतत् चिंन्तनम् अस्मिनध्याये भविष्यति।

चतुर्थोऽध्यायः- आधुनिककाले वानप्रस्थाश्रमस्य आवश्यकता उपयोगिता च

- आधुनिककालेन सह वानप्रस्थाश्रमस्य प्रासंगिकतायाः वर्णनमत्र भविष्यति।

उपसंहारः-

समेषां प्रकरणानां चिन्तनस्य सारः एवं निष्कर्ष उपसंहाररूपेण च अत्र भविष्यति।

(निष्कर्षः)

वानप्रस्थाश्रमस्य स्वरूपं महत्वञ्च पूर्वै आचार्यैः दत्तम्। तर्हि तस्य सङ्कलनमेव अस्य संशोधनस्य उद्देशः नास्ति अपितु आधुनिक युगे अस्य विषयस्य प्रासंगिकता का? आधुनिक काले अस्य का उपादेयता? समाजे कानि परिवर्तनानि अपेक्षितानि सन्ति? एषां समेषां प्रश्नानां चिंतनं समीक्षा च अस्मिन् संशोधने भविष्यति।

संदर्भग्रंथसूचिः-

१.आपटे हरी नारायण, 'स्मृतीनां समुच्चयः', आनन्दाश्रम मुद्रणालय, पुणे, १९०५, प्रथमावृत्ती

२.आगाशे काशीनाथशास्त्री, 'तैत्तरीय संहिता कृष्णयजुर्वेदीय, आनंदाश्रम, पुणे, १९७८२ प्रथमावृत्ती.

३. जिज्ञासू ब्रह्मदत्त, 'पाणिनीयः अष्टाध्यायीसूत्रपाठः', मन्त्री रामलाल कपूर ट्रस्ट, २००१, सोळावी आवृत्ती.

४. पाण्डेय उमेशचंद्र, 'गौतमधर्मसूत्राणि, चौखम्बा संस्कृत सीरीज ऑफिस, वाराणसी १. १९६६. प्रथमावृत्ती.

५.पाण्डेय उमेशचंद्र, 'श्रीमद्योगीश्वरमर्षियाज्ञवल्क्यप्रणीत याज्ञवल्क्यस्मृतिः', चौखम्बा संस्कृत सीरीज ऑफिस, वाराणसी- १, २०००, सहावी आवृत्ती.

६. फडके बाबाशास्त्री, 'तैत्तिरीय आरण्यक, आनंदाश्रम, पुणे (१८६७), प्रथमावृत्ती

७. बेलवलकर एस.के., 'महाभारत शान्तिपर्व, भांडारकर इन्स्टिट्यूट प्रेस, पुणे-४ (१९४३), प्रथमावृत्ती.

८. बेलवलकर एस.के., 'महाभारत सभापर्व, भांडारकर इन्स्टिट्यूट प्रेस, पुणे-४ (१९४३), प्रथमावृत्ती.)

९.भट्ट देवण, 'स्मृतिचन्द्रिका', गव्हर्नमेंट बेंच प्रेस, मैसूर, १९१४. प्रथमावृत्ती

१०. मिश्र प्रयागनारायण, 'आपस्तम्ब धर्मसूत्रम्', ज्ञानभारती पब्लिकेशन, दिल्ली, २००९, प्रथमावृत्ती.

११. महाभारतमहापुराणम्

१२. रघुवंशमहाकाव्यम्

१३. लिमये वि. प्र, वाडेकर र.द.,'अष्टादश-उपनिषदः', वैदिक संशोधन मण्डलम्, पुणे, १८८०, प्रथमावृत्ती.

१४. 'वसिष्ठ धर्मसूत्र', गवर्नमेंट सेंट्रल बुक डेपो, मुंबई, १८८३. प्रथमावृत्ती.

१५. वाल्मिकीरामायणम्

१६. सायण भाष्य समेतम् 'ऐतरेय ब्राह्मण,' आनंदाश्रम संस्कृत ग्रंथावली, पुणे, १९७९.

१७. त्रिपाठी सुन्दरलालजी, 'अष्टादशस्मृतिः' (हिन्दी टिका सहित), खोमराज श्रीकृष्णादास प्रकाशन, मुंबई, २००२, प्रथमावृत्ती.

पूर्वसंशोधनस्त्रोतसां सन्दर्भसूची -

(१) कविकुलगुरू कालिदाससंस्कृतविश्वविद्यालयस्य ग्रन्थालयः।

२) भारतीयसंस्कृतिग्रन्थालया

३) अन्तर्जालीयस्त्रोतांसि

www.shodhganga.ac.in

www.shodhgangotri.ac.in

<u>अनुमतिपत्रम् -</u>

“संस्कृतवाङ्मये वर्णितस्य वानप्रस्थाश्रमस्य समीक्षात्मकम् अध्ययनम्"इति संशोधनकार्यं आत्मोद्धाराय जनकल्याणाय विकासाय च महदुपकाराय वर्तते। इदृशमनुसन्धानम् इतः पूर्वं न केनाऽपि कृतमतः प्रा. डॉ. नन्दापुरीमहोदयानां मार्गदर्शने क्रियमाणस्य अस्य संशोधनकार्यस्य कृते अनुमति प्रदाय अनुगृह्णन्तु इति प्रार्थ्यते।

मार्गदर्शिका	संशेधिका
प्रा. डॉ.नन्दा पुरी,	**भक्ति केळकर,**
मा. अधिष्ठात्री	